द्रव्यत्वाद्यपेक्षया वा समानजातीयत्वे कल्प्यमाने नियमानर्थक्यम् सर्वस्य सर्वेण समानजातीयत्वात्। नाप्यनेकमेवारभते नैकमिति नियमोऽस्ति अणुमनसोराद्यकर्मारम्भाभ्युपगमात्। एकैकोहि परमाणुर्मनश्चाद्यं स्वकर्म्मारभते न द्रव्यान्तरैः संहत्येत्यभ्युपगम्यते। द्रव्यारम्भ एवानेकद्रव्यारम्भकत्वनियम इति चेन्न परिणामाभ्युपगमात्। भवेदेष नियमो यदि संयोगसचिवं द्रव्यं द्रव्यान्तरस्यारम्भकमभ्युपगम्येत तदेव तु द्रव्यं विशेषवदवस्थान्तरमापद्यमानं कार्य्यं नामाभ्युपगम्यते तच्च क्वचिदनेकं परिणमते मृद्बीजाद्यङ्कुरादिभावेन क्वचिदेकं परिणमते क्षीरादि दध्यादिभावेन। नेश्वरशासनमस्ति अनेकमेव कारणं कार्य्यं जनयतीति। अतः शास्त्रप्रामाण्यादेकस्माद्ब्रह्मण आकाशादि महाभूतोत्पत्तिक्रमेण जगज्जातमिति निश्चीयते। तथा चोक्तं "उपसंहारदर्शनान्नेति चेन्न क्षीरवद्धीति"। यच्चोक्तमाकाशोत्पत्तौ न पूर्ब्बोत्तरकालयोर्विशेषः सम्भावयितुं शक्यत इति तदयुक्तं येनैव हि विशेषेण पृथिव्यादिभ्यो व्यतिरिच्यमानं नभः स्वरूपवदिदानीमध्यवसीयते स एव विशेषः प्रागुत्पत्तेर्नासीदिति गम्यते। यथा च न ब्रह्मस्थूलादिभिः पृथिव्यादिस्वभावैः स्वभाववत् "अस्थूलमनणुव्यादि" श्रुतिभ्यः एवमाकाशस्वभावेनापि न स्वभाववत् अनाकाशमिति श्रुतेरवगम्यते। तस्मात् प्रागुत्पत्तेरनाकाशमच्छिद्रमिति स्थितम्। यदप्युक्तं पृथिव्यादिवैधर्म्यादाकाशस्याजत्वमिति तदप्यसत्। श्रुतिविरोधे सत्युत्पत्त्यसम्भवानुमानस्याभासत्वोपपत्तेः उत्पत्त्यनुमानस्य च दर्शितत्वात् अनित्यमाकाशमनित्यगुणाश्रयत्वात् घटादिवदित्यादिप्रयोगसम्भवाच्च। आत्मनानैकान्तिकमिति चेन्न तस्यौपनिषदं प्रति अनित्यगुणाश्रयत्वासिद्धेः। विभुत्वादीनाञ्चाकाशस्योत्पत्तिवादिनं प्रत्यसिद्धत्वात्। यच्चैतदुक्तं शब्दाच्चेति। तत्रामृतत्वश्रुतिस्तावद्वियति "अमृता दिवौकस इतिवद्द्रष्टव्या उत्पत्तिप्रलययोरुपपादितत्वात्। "आकाशवत् सर्व्वगतश्च नित्यः" इत्यपि प्रसिद्धमहत्त्वेनाकाशेनोपमानं क्रियते निरतिशयमहत्त्वाय नाकाशसमानत्वाय। यथेषुरिव सविता धावतीति क्षिप्रगतित्वायोच्यते नेषुतुल्यगतित्वाय तद्वत्। एतेनानन्तत्वोपमानश्रुतिर्व्याख्याता। "ज्यायानाकाशादिति" श्रुतिभ्यश्च ब्रह्मणः सकाशात् आकाशस्योनपरिमाणत्वसिद्धिः। "न तस्य प्रतिमास्तीति च ब्रह्मणोऽनुपमानत्वं दर्शयति। "अतोऽन्यदार्त्तमिति" च ब्रह्मणोऽन्येषामाकाशादीनामार्त्तत्वं दर्शयति। तपसि ब्रह्मशब्दवदाकाशस्य जन्मश्रुतेर्गौणत्वमित्येतदाकाशसम्भव श्रुत्यनुमानाभ्यां परिहृतम्। तस्माद्ब्रह्मकार्य्यं वियदिति सिद्धम्"।

तस्य जन्यत्वेऽपि आप्रलयस्थायित्वात् गौणनित्यत्वम्। वैशेषिकाणां नित्यत्वानुमानं तु बलवदागमविरुद्धत्वात् नरकपालशुचित्वानुमानवत् बाधितमिति द्रष्टव्यम्। सांख्यमते दिक्कालयोराकाशएवान्तर्भावः अतएव सां० कौमुद्याम् कालरूपतत्त्वान्तरं निराकृतं यथा "कालश्च वैशेषिकाभिमत एकोन अनागतादिव्यवहारभेदं प्रवर्त्तयितुमर्हतीति तस्मादयं यैरुपाधिभेदैरनागतादिभेदं प्रतिपद्यते सन्तु त एवोपाधयोऽनागतादिव्यवहारहेतवः कृतमत्रान्तर्गडुना काले नेति सांख्याचार्य्याः तस्मान्न कालरूपतत्त्वान्तराभ्युपगम इति" सूत्रे तु आकाशप्रकृतिकत्वं तयोरुक्तम् यथा "दिक्कालावाकाशादिभ्यः" सू०। नित्यौ यौ दिक्कालौ तावाकाशप्रकृतिभूतौ प्रकृतेर्गुणविशेषावेव। अतो दिक्कालयोर्विभुत्वोपपत्तिः। "आकाशवत् सर्वगतश्च नित्य" इत्यादिश्रुत्युक्तं विभुत्वं चाकाशस्योपपन्नम्। यौ तु खण्डदिक्कालौ तौ तु तत्तदुपाधिसंयोगादाकाशादुत्पद्येते इत्यर्थः। आदिशब्देनोपाधिग्रहणमिति। यद्यपि तत्तदुपाधिविशिष्टाकाशमेव खण्डदिक्कालौ तथापि विशिष्टस्यातिरिक्तताभ्युपगमवादेन वैशेषिकनयेनास्य कार्य्यतावत् तत्कार्य्यत्वमत्रोक्तम्" सां०भा०। पदार्थखण्डने शिरोमणिना अस्य ईश्वरस्वरूपानतिरेक उक्तः "दिक्कालावीश्वरान्नातिरिच्येते गगनमपि तथेति"। सौगतमतसिद्धे आवरणाभावरूपे निरुपाख्ये २ पदार्थभेदे च। तदेतत् मतम्" शा०सू०भाष्ययोर्निराकृतम् "आकाशे चाभावात्" सू०। "यच्च तेषामेवाभिप्रेतं निरोधद्वयमाकाशञ्च निरुपाख्यमिति तत्र निरोधद्वयस्य निरुपाख्यत्वं पुरस्तान्निराकृतम् आकाशस्येदानीं निराक्रियते। आकाशे चायुक्तोनिरुपाख्यत्वाभ्युपगमः प्रतिसंख्याप्रतिसंख्यानिरोधयोरिव वस्तुत्वप्रतिपत्तेरविशेषात् आगमप्रामाण्यात्तावदात्मनः आकाशःसम्भूतइत्यादि श्रुतिभ्यः आकाशस्य वस्तुत्वसिद्धिः। विप्रतिपन्नानपि प्रति शब्दगुणानुमेयत्वं वक्तव्यं गन्धादीनां गुणानां पृथिव्यादिवस्त्वाश्रयत्वदर्शनात्। अपि चावरणाभावमात्रमाकाशमिच्छतस्तव एकस्मिन् सुपर्णे पतत्यावरणस्य विद्यमानत्वात् सुपर्णान्तरस्य पित्सतोऽनवकाशत्वप्रसङ्गः यत्रावरणाभावस्तत्र पतिष्यतीति चेत् येनावरणाभावो विशिष्यते तत्तर्हि वस्तुभूतमेवाकाशं स्यान्नावरणाभावमात्रम्